ಜಾಗರೂಕತೆಯಿಂದ ಬಳಸಿ

(5)

Grammar
E
-2794

ಪೆಟ್ಟಿಗೆ ಸಂಖ್ಯೆ..........................

॥ संस्कृताक्षरशिक्षा ॥

SANSKRIT ALPHABET PRIMER

SREE CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
वाणीं भजत मैत्रीमी
FORT, BANGALORE.

BY THE LATE

S. VENKATARAMA SASTRI, B.A.,

MAHARAJA'S COLLEGE, MYSORE.

T 253
Accn. 2597

THIRD EDITION.

MADRAS:

THE MODERN PRINTING WORKS, MOUNT ROAD.

1923

[Copy Right Registered.] [Price Three Annas.

Directions for Using the Book.

The letters of the Sanskrit alphabet are learnt soonest and most easily when written out repeatedly. The learner is generally made to utter, slowly and as often as possible, the sound of every letter that he is writing. Learnt in this way, the letters and their sounds become fixed in the memory and the art of reading correctly any printed book or manuscript may be mastered.

2. To a beginner, the conjunct consonants present some difficulty. Their composition and the peculiar characters employed to denote them are shown thoroughly and cover a good deal of space.

3. The exercises are graduated and when written to dictation will prepare the way for reading the stotras or prayers in the latter part of the book.

4. The stotras are to be copied out till they are got by heart; then they are to be recited to facilitate ready and rapid pronunciation. I send out this book in the hope that it will minimise the difficulties commonly experienced by children in learning to read Sanskrit books.

24th December 1903.
BANGALORE CITY.

S. VENKATARAMA
SASTRI.

Preface to the Second Edition.

The second edition of Akshara-siksha will be found to be a great improvement upon the first. The exercises are so graduated that the learner can pass by easy stages, from the beginning to the end of the book in about three months.

The fifteen lessons at the end afford good reading matter and are on subjects that readily appeal to the minds of the children.

In the initial stage, repeated writing must be insisted on, as the easiest and the best means of fixing the characters on the memory and making rapid acquisitions.

The transition from simple to conjunct consonants has been facilitated by the insertion of a reading and writing exercise of about one hundred sentences forming a new feature of the second edition.

The great demand for the book testifies to its growing appreciation in elementary schools.

2nd February 1910.
MYSORE.

S. VENKATARAMA SASTRI.

T 253
2597

श्रीगणेशायनमः

शुभमस्तु-

॥ संस्कृताक्षराशिक्षा ॥

स्वराः

अ आ, इ ई,

उ ऊ, ऋ ॠ,

ऌ ॡ, ए ऐ,

ओ औ, अं अः,

ँ ः,

व्यञ्जनानि·

क्	ख्	ग्	घ्	ङ्
च्	छ्	ज्	झ्	ञ्
ट्	ठ्	ड्	ढ्	ण्
त्	थ्	द्	ध्	न्
प्	फ्	ब्	भ्	म्
य्	र्	ल्	व्	श्
	ष्	स्	ह	

अभ्यास—१.

अट्	आस्	ईड्	ऋच्
अत्	इष्	ईश्	ऋध्
अप्	इल्	ईर्	ऋष्
अच्	इत्	ईष्	एज्
अव्	इच्	ईह्	एध्
अश्	इण्	उच्	एष्
अक्	इट्	उष्	ऐत्
अद्	इश्	उत्	ओम्
आप्	इन्	ऊह्	औच्

स्वरपरासंयुक्तव्यञ्जनानि.

क	का	कि	की	कु	कू	कृ	कॄ	के	कै	को	कौ
ख	खा	खि	खी	खु	खू	खृ	खॄ	खे	खै	खो	खौ
ग	गा	गि	गी	गु	गू	गृ	गॄ	गे	गै	गो	गौ
घ	घा	घि	घी	घु	घू	घृ	घॄ	घे	घै	घो	घौ
ङ	ङा	ङि	ङी	ङु	ङू	ङृ	ङॄ	ङे	ङै	ङो	ङौ
च	चा	चि	ची	चु	चू	चृ	चॄ	चे	चै	चो	चौ
छ	छा	छि	छी	छु	छू	छृ	छॄ	छे	छै	छो	छौ
ज	जा	जि	जी	जु	जू	जृ	जॄ	जे	जै	जो	जौ

झ	झा	झि	झी	झु	झू	झृ	झॄ	झे	झै	झो	झौ
ञ	ञा	ञि	ञी	ञु	ञू	ञृ	ञॄ	ञे	ञै	ञो	ञौ
ट	टा	टि	टी	टु	टू	टृ	टॄ	टे	टै	टो	टौ
ठ	ठा	ठि	ठी	ठु	ठू	ठृ	ठॄ	ठे	ठै	ठो	ठौ
ड	डा	डि	डी	डु	डू	डृ	डॄ	डे	डै	डो	डौ
ढ	ढा	ढि	ढी	ढु	ढू	ढृ	ढॄ	ढे	ढै	ढो	ढौ
ण	णा	णि	णी	णु	णू	णृ	णॄ	णे	णै	णो	णौ
त	ता	ति	ती	तु	तू	तृ	तॄ	ते	तै	तो	तौ

थ	था	थि	थी	थु	थू	थृ	थॄ	थे	थै	थो	थौ
द	दा	दि	दी	दु	दू	दृ	दॄ	दे	दै	दो	दौ
ध	धा	धि	धी	धु	धू	धृ	धॄ	धे	धै	धो	धौ
न	ना	नि	नी	नु	नू	नृ	नॄ	ने	नै	नो	नौ
प	पा	पि	पी	पु	पू	पृ	पॄ	पे	पै	पो	पौ
फ	फा	फि	फी	फु	फू	फृ	फॄ	फे	फै	फो	फौ
ब	बा	बि	बी	बु	बू	बृ	बॄ	बे	बै	बो	बौ
भ	भा	भि	भी	भु	भू	भृ	भॄ	भे	भै	भो	भौ
म	मा	मि	मी	मु	मू	मृ	मॄ	मे	मै	मो	मौ

य	या	यि	यी	यु	यू	यृ	यॄ	ये	यै	यो	यौ
र	रा	रि	री	रु	रू	ऋ	ॠ	रे	रै	रो	रौ
ल	ला	लि	ली	लु	लू	लृ	लॄ	ले	लै	लो	लौ
व	वा	वि	वी	वु	वू	वृ	वॄ	वे	वै	वो	वौ
श	शा	शि	शी	शु	शू	शृ	शॄ	शे	शै	शो	शौ
ष	षा	षि	षी	षु	षू	षृ	षॄ	षे	षै	षो	षौ
स	सा	सि	सी	सु	सू	सृ	सॄ	से	सै	सो	सौ
ह	हा	हि	ही	हु	हू	हृ	हॄ	हे	है	हो	हौ

अभ्यास—२.

कत	कृषि	लता	पार	ऋषिः	निधि
कट	जय	राका	राव	पविः	हित
कच	पत	माता	वाल	किरिः	तिल
गत	चल	रमा	मुख	खुर	एति
चर	अट	रुत	तुष	सुरा	लोक
पर	वश	छाया	शात	यति	ऐमि
फल	भर	वशा	ऊत	तिमि	पिता
मय	तल	नखाः	एड	मिति	जित
हर	सह	गदाः	आम	इति	पीत
कुल	हुत	पुर	हेषा	फेन	नारी
अज	हस	वटाः	मार	अपि	वीर
तव	नग	खात	वाम	पालि	बली
मम	वर	वात	तान	शालि	कील
वद	कृति	माया	जार	वाति	टीका
तप	यज	मोद	होरा	पोत	राधा
जव	पल	वास	राजा	यासि	कीटः
वीटी	तूल	भेक	शैल	कोश	मौलि

लृता	मातृ	फेरु	मैवं	तोष	धौत
भूमि	वृष	केतु	वैर	लोम	ढौके
मूत	तृषा	खेय	शैव	मोचा	गौरी
यूका	तृण	लेश	सैव	पोटा	पौर
वधूः	दृषत्	वेमा	लभै	तोय	काल
धूम	पृषत्	हेतु	यत	होम	नौका
रूप	शकृत्	याचे	तैल	कोल	चौर

अभ्यास—२.

कमल	सवन	कशेरु	सुदूर
विशद	कुलिश	पयोद	कौलीन
सरल	खुरली	पीयूष	कोटीर
वनिता	धोरणी	पटोल	यशोदा
पनस	मयूरी	नमुचि	सुरेश
महिला	वामोरू	गोचर	कुबेर
गगन	केतकी	हृदये	रुचिर
वदन	पिनाकी	विनोद	मिहिर
ललिता	अनूप	गरिमा	विहार
विहग	केयूर	कुचेल	मराल

चुलुक	वीवध	साकेत	कृपालु
गोकुल	भूसुर	नमेरु	सूनृत
किरात	नीहार	जलूका	गोधूम
षोडश	मैनाक	विदेश	चकोरी
घटिका	लौकिक	फेरव	पारायण

वनेचर	वनवास	कालागुरु
विनायक	गोपीरमण	नामावली
कृपारस	कालदेश	करुणारस
पयोदधि	अजगव	मरकत
बहुदोष	धनमद	करतल
महोदधि	करकलित	गजभय
वियोगिनी	भयचकित	धनरस
विशेषण	पयोदालि	कलरव
गदायुध	तृणोलप	अवनत
शीतोदक	शुनासीर	उपवन
गृहोचित	विलासिनी	पणपर
सुरोपम	उपवन	अशनाया

लोकापवाद धूमातिरेक पूजाविशेष
कूपोदकाहित मातापितरौ शेषशायी
पायसभोजन मोदकाहार अवभृथदिवस
कृकवाकुरुत कुमारसेवक औषधसेवा
पीयूषसेचनम् भारावतरणम् कैटभजित्
कालातिपातपरिहार कामिनीजन
कुटिलालका पादतलपतित नतजनशरण
अरुणाधर लोकायतिक
करुणाशालिकपालिभागधेयम्

बहु बालक जन पाठन विधये यतमानः
सरलैः पदनिचयैरिह रचयामि नवीनाम् ।
अवतारण पदवीं सुर भाषामृत पूरे
गहना अपि निगमा अवगाढा भवितारः ॥

अभ्यास—४.

विदधीत नरो हितमेव नृणाम्

अवधीरयते हितमेष जडो बहुधा गुरुणाऽभिहितोऽपि न किम्

अशान पनसानि यथाकामम् ततो मधु च लीढि नोदररुजा जायत इति शृणुनो वयम्

माकृथा वृथा कालयापनम्

देवि वरं वृणे

गोपो गा गोपायति

नारी धूपायति केशान्

धनिकेन दीयमानं वसु याचकेन आदीयते

तारा नभसि चकासति

रविवासरे सायं राहुकाल इति दैवविदाह

पिता वा माता वा सोदरो वा सनाभयो वा इतरे परिमितमेव ददति पतिरेक एव योषाया अपरिमितं वसु ददाति

नमामि देवमशानं गरलं यः पुराऽगिरत्

अनागसि मयि परिहर कोपम्

काशीं यियासति पथिकनिवहः

धनं यावदानीयते मया तावदेव गृहे जनः कुशलं विविदिषति

रमयति वामेव मामियं पामा

गोपुरे वसति वानर एषः

मधुमासे परभृतया चूततरौ रूयते मधुरम्

गायति बाला मधुरं गीतानि विनोदनाय शिशोः

भूषणदं नाथं नारी कामयते

सा बाला परवतीति मे विदितम्

महीसुरोऽवगाहते नदीमुपासितुं रविम्

भूतलेऽशेमहि वयं नियता ऋषिचोदनात्

आचारवतामेव सफलं तपो भवतीति पुराणा मुनयोऽनुशासति

बीजाकरोति केदारान् कृषीवलः

न रोचये परीवादं साधूनामहमीदृशम्

वीणां वादयति नारी शृणुमो वयमत्रहिताः

मोदकं देहीति रोदिति बालकः

अशनाया भृशं बाधते

पिपासितो जलं पिबतु

पुरा दशरथो नाम राजाऽऽसीत्

को नामासि वटो ?

वहति जलमियम्

सुकृती धनं लभते

गां बधान गवे घासं देहि

वामनो बलिं वसुधामयाचत

कमला गृहे वसतात्

मानय बुधान् पूजय देवान्

वृथा कोलाहलं कुरुथ बधिरोऽयं न शृणोति

अतिसृजति धनं याचकाय दीनेषु दयमानो गृही

वनितया सह रथमारोहति विलासी पतिः
बिभेति साधुः खलात्
आशा दासी येषां तेषां दासायते लोकः
अतिभोजनमामयमावहेत्
वेदानधीयते ये तानेवाकारयेदयं गेही
कामातुरो मा भूः
सेनापतिमाकारय
शीलयुता शोभते वधूः
मातली रथमानयति
लोकायतिकानेवं वदामः
कौपीरपः पिबति कातर एष भूयः
गोपाल इह चरतात्
औषधं निषेवतामातुरः
आतपे शोषमेति महौषधिः
कानने मृगादना बहवः
ईरितां वाचं शृणुयात्
कोपारुणितलोचनो वामामेवमवदत्
ओघवाताहतं बीजम् केदारिण एव भवति

जाने काकोलूकीयम्
ईशानाय नमो नमः
के दारपोषणरताः
वायसाय बलिं देहि
बधिरो न शृणोति मे वचः
धनकथां माकृथाः
मा गा अनाथालयम्
कूपो निरुदक एष खायतां यावदायाति पुनरपि जलम्
कुपिता महिलाऽनुनीयताम्
नौमि नारायणं हरिम्
अभिमतं वो भूयात्
अनया सदृशी नारी विरला भूतलेऽनत्र
अनुग्राहीति देवो मामशादथ दयापरः
निदाघे पथिकानेतान् आतपो बाधते भृशं
भीरवो गेहेशूराः कतिपये
हीनैः सह समागामी हीयते पुरुषो धिया
उदारता हि धनिकेषु शोभते

एको देवः केशवो वा शिवो वा

जगदखिलं देव आयतते

को नामाहितमाचरेत् यदि पापादसुखं भवतीति जानीयात्

बाला बहव आयासिषुः

गुणवती जाया—धनागमो महान्—माता हितैषिणी—सुता वशंवदाः—एतानि भागधेयानि

तेन सह्रालापो मे रोचते

वासुदेवः पाता नो भगवान्

सेवया महीभृतां सेवको धनं लभते

सदाचारे रमते साधुः

अविनय आपदो हेतुः

शिशूनां हिताय भेषजमुपपादयति

गुरवो मया बहुधा तोषिता अनुकूला अभवन्

रजनीमुखे वीथीषु चकासति दीपाः

सती गोपायति शीलम्

मठकदेशे शयानो यापय यामिनीमिमाम्

नरवाहननामानं राजसूनुमवेहि माम्

ऋचमेकामपि नाधीते वटुः

सरलैरेव पदैरियमारचि गीतिः

नागरिको रमयति पामरान्

गोमयेन लेपो गृहाणां शुचितामावहतीति जना आहुः

कोपेऽपि कमनीयं ललनाया मुखम्

विदुरो नीतिमुपादिशत्

सुताया अनुरूपो वरो विचीयताम्

अविवेकः परमापदां पदम्

आरामे वानरो नालिकेरमपातयत्

नारीणां भूषणाशा भूयसीति को वा न वेद

गोचरे चारयाणि गा मासमेकम्

निदाघे जलेन तरूणां सेचनं विधीयते

शुचयो हि चिरायुषो भवेयुः

अलमलमतिसाहसेन

रोच्यतां ते केदारेषु विहारः
कौमारे गीतमधीयताम्
धौतं वासः परिधीयते
कुत एतद्वासादितमिति विविदिषामि
मोदे गुणेषु ते बाल पुरुषायुषमेधि भोः
असाम बलिनो भुवि-जीवेम सुखिनो वयम्
नानृतमभिवदेत् अनृतं हि पातयति
यः सुखं कामयते-स सुखाधिगम उपायं विचिनोतु
सुतो योऽविधेयो भवति न स मातुरभिमतो भवति
कुमारीणामनाथानामापदोऽसकृदापतेयुः
वचो नाजीगणदसौ सुहृदां वो हितैषिणां
कारागृहे चिरोषितोऽहमिति न मया संसृजति साधुजनः
कालो वृथा सागमदिति करणीयमिदमुदपीपदम्
दुहिताऽपि विनेयेतिनावीविदत भोः कथम्

अवधेहि महाभाग गुरुणा यदुदीरितम्

पितृचोदितो भोजनाय पुरोहितमाकारयति बटुः

एकोयं धनुरादाय नराणां शतमपि योधयति

नदीं नावा तराम—ततो यानमारूढा नगरमासादयाम

यतो देव बिभीयाम ततो नः कुरुतादभयम्

अभ्यास—५.

स्वरान्तसंयुक्तव्यञ्जनानि.

क् क क्क तक्कोलः, पुक्कसः, ढक्का, कुक्कुरः अवाक्करः, वाक्कलहः

क् ख क्ख उदक्खातः, जलमुक्खचरः, गौः कामधुक्खरतिकिं वदतेह यूयम्

क् ण क्ण वृक्णः

क् त क्त शक्तिः, सूक्तम्, शुक्तिः,

अनुरक्तजनोक्तिमादरा-
दशृणोदायतलोचना मुहुः

क् थ क्थ सिक्थम्,

मुदिता ममगेहिनी भवेत्
पितृरिक्थमिदं लभेय चेत्
सक्थिघातभृशपीडितं रिपुम्
मातुदेति मधुसूदनो वदत्

क् न क्न न शक्नोति रथं वोढुमेकहायन गोवृषः, पलिक्नी, यक्नोरूपं निशामय

क् प क्प वाक्पटुता

असृक्पचरणादिदं वनमसेवितं मानुषैः,

अधोक्पुरामहीं धेनुं पृथू राजा दयापरः

क् फ क्फ सूनृतवाक्फलसौहृदमेवं साधुरनारतमाप किलैषः

क् म क्म रुक्मिणी

क्‌ य क्य वाक्यम्,शिक्याधृतघटयुगले सुरसरि
-तो नीरमानयामि पुरा,मौक्यं विदुषां
संसदि वरमबुधानामितीरयाणि शनैः

क्‌ र क्र विक्रमः, तक्रविक्रयप्रक्रिया, चक्रम्
वक्रगतिः

क्‌ ल क्ल शुक्ले शशीव सुभगः
धीरे विक्लवता कुतः
जननीभृशलालनतो
नाधीते यो यथावदभियोगात्।
अमराक्लातेरपि तनयः
क्लेशं पितुरनवरतमावहति ॥

क्‌ व क्व पक्वमोदनमिहोपदीयते
सृक्वणी रसनया परिलीढः
पोतकौ गजरिपोरभिरामौ

क्‌ ष क्ष वृक्षे पक्षिण आसते,
तरक्षुराममेव भक्षयतिमांसम्,
कौक्षेयके तवाक्षिणी पततः

क्‌ष्‌ न क्ष्म पक्ष्मलाक्षी क्ष्मापतिं आक्षिपत्

क्ष्य क्ष्य यक्ष्ये देवानखिलान्
भोक्ष्ये पूतं हविः सुरोपहृतम् ।
शक्ष्यामि वोढुमचिरात्
साधूनामविकलोपकरणधुराम् ॥
क्ष्ण क्ष्ण अक्ष्णः कनीनिका, सुतीक्ष्णऋषिः
क्ष्व क्ष्व इक्ष्वाकुवंशे, आचक्ष्व देवि किमितः
परमाचरेयम्
क्स क्स वाक्स्मृतिः, वाक्संयमः
ख्य ख्य आख्या, विख्यात, आख्यायिका,
आचिख्यासा
ख्व ख्व आख्वागतिः
ग्ग ग्ग गुग्गुलुः, दिग्गजः, पृथग्गमनम्,
वाग्गौरवम्
ग्घ ग्घ वाग्घारिः, आधोग्घटे पयोनवम्
ग्ड ग्ड बलिभुग्डयते पथि
ग्ण ग्ण रुग्णः
ग्द ग्द दिग्दन्तिनः, वाग्दोषः
ग्ध ग्ध दुग्धम् , विदग्धः, वाग्धोरणी

ग्न ग्न अग्निः, भुग्नम्. भग्नाशः

ग्ब ग्ब दृग्बलम्, बलिभुग्बाधते भृशम्

ग्भ ग्भ वाग्भटः, दृग्भागः

ग्म ग्म, तिग्मः, वाग्मी, अयुग्मशरः

ग्य ग्य योग्यः, वैराग्यम् , भाग्यम्

ग्र ग्र समग्रः, उदग्रः, विग्रः, शिग्रः

ग् ल ग्ल ग्लौः, ग्लानुः, हुतभुग्लवः

ग् व ग्व यत्वाग्वा, हितवाग्वाचमैरयत

ग्र्य् ग्र्य अग्र्यम्

घ् न घ्न निघ्नः, विषघ्नम्, शतघ्नी

घ् न्य घ्न्य अघ्न्या

घ् म घ्म उदघ् घ्मलति

घ् य घ्य शेषोघ्यसखि, माघ्यम्

घ् र घ्र शीघ्र, अनाघ्रातम्

घ् ल घ्ल वाघ् घ्लादयति

घ् व घ्व लघ्वी

ङ् क ङ्क लङ्का, पङ्कजाक्षी, कलङ्क, ताटङ्क

ङ्क् त ङ्क्त पाङ्क्तिः, भुङ्क्ते

ङ्क्थ ङ्क्थ अभुङ्क्थाः

ङ्क्य ङ्क्य शङ्क्यम्

ङ्क्र ङ्क्र सङ्क्रमणम्, सङ्क्रान्तिः, जानुच-
ङ्क्रमणम्

ङ्क्ष ङ्क्ष मङ्क्ष, सङ्क्षेपः आकाङ्क्षा

ङ्ख ङ्ख शङ्खः, पुङ्खितशरः

ङ्ग ङ्ग अङ्गम्, लवङ्गः, पतङ्गः, अपाङ्गः,
भाङ्गिः
पिशङ्ग्या कुरङ्ग्या नताङ्ग्याः सह-
क्त्वम्

ङ्ग्य ङ्ग्य अङ्ग्यम्

ङ्ग्र ङ्ग्र सङ्ग्रहः, सङ्ग्रामः

ङ्ग्ल ङ्ग्ल तङ्ग्लानं वीक्ष्य जननी

ङ्ग्व ङ्ग्व पङ्ग्वादयो दीनजनाः

ङ्घ ङ्घ सङ्घः लङ्घनम्, सङ्घातः

ङ्घ्य ङ्घ्य अलङ्घ्यम्

ङ्घ्र ङ्घ्र अङ्घ्रिः

ङ्ङ ङ्ङ उदङ्ङासीनः

ङ्न ङ्न वाङ्न्यमनम्

ङ्म ङ्म वाङ्मनसे

ङ्य ङ्य उदङ्याजयति

ङ्र ङ्र उदङ्रोहति

ङ्ल ङ्ल उदाङ्लिखति

ङ्व ङ्व उदङ्वाचयति

ङ्श ङ्श उदङ्शोभते

ङ्ष ङ्ष अवाङ्षोडशवारं क्षालयति

ङ्स ङ्स उदङ्सुखासीनो भुङ्क्ते

ङ्ह ङ्ह अवाङ्हसति

च्च च्च उच्चः पटच्चरम्, शिलोच्चनः, कच्चित्

च्छ च्छ कच्छपः, मुखच्छविः, पुच्छकः,

कपिकच्छूः

च्छ्य च्छ्य आगच्छच्छ्यामलो नरः

च्छ्र च्छ्र आमूलाच्छ्रोतुमिच्छामि,

लसच्छ्रीकः, उच्छ्रायः

च्छ्ल च्छ्ल उदाहरच्छ्लोकमेकम्, उच्छ्लकः
च्छ्व च्छ्व तच्छ्वो वो गृहे भोक्ताहे
च्ञ च्ञ याच्ञा
च्म च्म वच्मि वाचमिमां शृणु
च्य च्य च्यवनऋषिः, पच्यमान ओदनः,
सूच्यते
च्र च्र
च्ल च्ल
च्व च्व कच्वी
छ्य छ्य छ्यवते
ज्ज ज्ज सज्जनः, मज्जनम्, कज्जलम्, मे-
घाज्जलं पतति
ज्ज्य ज्ज्य सज्ज्योतिः
ज्ज्व ज्ज्व उज्ज्वलनम्
ज्झ ज्झ उज्झति
ज्ञ ज्ञ अभिज्ञः, ज्ञातयः, गुणज्ञः
ज्म ज्म युनज्मि
ज्य ज्य पूज्याः, ज्येष्ठः, राज्यम्, ज्याघोषः

ज्र ज्र वज्रम्
ज्व ज्व ज्वलनः, ज्वरः, यज्वा
ञ्च ञ्च सञ्चारः, काञ्चनम, वञ्चितः चञ्चु
ञ्च्व ञ्च्व चञ्च्वा
ञ्छ ञ्छ लाञ्छनम्, वाञ्छा, उञ्छः
ञ्ज ञ्ज अञ्जनं, कुञ्जरः रञ्जितः, पुञ्जः
ट्ट ट्ट घरट्टः, कुट्टनम् , हट्टः, कोट्टमः
पट्टिशः
ट्म ट्म कुट्मल अथवा कुट्मल
ट्य ट्य नाट्यम्, अटाट्या
ट्व ट्व खट्वा, पट्वी
ठ्य ठ्य शाठ्यम्
ड्ग ड्ग षड्गुणाः
ड्ड ड्ड उड्डीनः मड्डुकः लड्डुकः
ड्ढ ड्ढ याते दिवसे भिक्षुः पटुनादम-
वादयड्ढक्काम्
ड्व ड्व मधुलिड्वाधामिह किं हरिणाक्षी
शङ्कते विपिने

ड्भ ड्भ नहुषो देवराड्भूतो यावद्दैच्छच्छचीं सतीम्

ड्म ड्म कुड्मल

ड्य ड्य कुड्यम्, जाड्यम्

ड्र ड्र अथापिनड्राक्षसराजसूनुमक्षं रणे मारुति राशुंकारी, षंड्रसाः

ड्ल ड्ल तुराषाड्लोलुभाज्जायाङ्गौतमः कुपितोऽशपत्

ड्व ड्व विड्वराहः अतृणेड्वालिनं रामः, षड्विधरसोपेतमददादातिथये भोजनम्

ढ्य ढ्य आढ्यः

ण्ट ण्ट कण्टकः, घण्टा, चिरिण्टी, फाण्टः

ण्ठ ण्ठ कलकण्ठः, शुण्ठी, कुण्ठः कण्ठीरवः

ण्ड ण्ड कण्डूः, पलाण्डुः, दण्डी, मण्डम, मण्डूकः, गण्डूषः, कोदण्डः पाण्डितः

ण्‌ढ ण्ढ हुण्ढिः, पिण्ढि, तृण्ढ

ण्‌ण ण्ण विषण्णः, षण्णां रसानां लवणो
हि मुख्यः

ण्‌म ण्म षण्मुखः, षाण्मासिक आच्छादः

ण्‌य ण्य षाड्गुण्यम्, पण्यवीथी, पुण्यपुरुषः
शरण्यः

ण्‌र ण्र उरण्रपरः
सुगण्राज्ञो धनं रक्ष शठा मातृलुप-
ञ्जनाः

ण्‌ल ण्ल सुगण्लेखमलेखयत्

ण्‌व ण्व कण्वः, किण्वम्, करेण्वारोहणम्

त्‌क त्क उत्कः, तात्कालिकम्, पृषत्कः
सत्कुलम्, आपत्कालः, शरत्कुसुमानि

त्‌ख त्ख उत्खातः, अकरोत्खादिरं यूपम्
साक्षात्खलो मां वरितुङ्किलायात्

त्‌त त्त उत्तरा, मत्तवारणः हरदत्तः, आयत्तः

त्‌थ त्थ विकत्थनम्, उत्थितः कपित्थः

त्न त्न रत्नम्, पत्नी, नूत्नन्, अरात्निः

त्न्य त्न्य पत्न्या

त्प त्प उत्पत्तिः, नीलोत्पलम्

त्प्र त्प्र उत्प्रेक्षा, विपत्प्रतीकारः

त्प्ल त्प्ल उत्प्लवः

रोहत्प्लक्षमिमं शैलमायाहि पथिकोषसि

त्फ त्फ सायङ्कालेषु निनदत्फेरवैरतिभीषणम्

त्म त्म आत्मा गरुत्मान्,

त्य त्य सत्यम्, वात्या, नृत्यम्, वैयात्यम्

त्र त्र अमत्रम्, पोत्री, दात्रम् लवित्रम्

खनित्रम् तोत्रम् लित्रम्

त्व त्व सात्विकः, तत्वम् मरुत्वान् त्वरा,

विसृत्वरम्

त्स त्स वत्सलः, कुत्सितः, उत्साहः

त्स्य त्स्य वत्स्यति, वात्स्यायनः

थ्न थ्न मथ्नाति

थ्‌य थ्य याथातथ्यम्, मिथ्या, रथ्या, पथ्यम्
नेपथ्यम्

थ्‌व थ्व पृथ्वी, वेपथ्वाकुलितः

द्‌ग द्ग मुद्गः गद्गदः, मद्गुः

द्‌घ द्घ उपोद्घातः, उद्घोषणम्

द्‌द द्द उद्दीपनम्, उद्देशः, सकृद्दीव्यति,
मरुद्देवताकम् हविः

द्‌ध द्ध उद्धारणम्, पद्धतिः, सिद्धिः, युद्धम्

द्‌न द्न मृद्नाति

द्‌ब द्ब दृषद्बलवर्ति, उद्बाहुः, बलवद्बा-
धते ज्वरः

द्‌ब्र द्ब्र तद्ब्रवीति

द्‌भ द्भ उद्भवः उद्भेदः, असद्भावः

द्‌भ्य द्भ्य सद्भ्यः, पद्भ्याञ्चरति

द्‌भ्र द्भ्र नदद्भ्रमरनादिता

द्‌म द्म सद्म, पद्मम्

द्‌य   द्य पाद्यम्, सद्यः, अद्य, विद्या, विद्युत्,
खद्योतः

द्‌र   द्र दरिद्रः, भद्रम्, मुद्रा, निद्रालुः,
द्रोणः, द्रविणम्, समुद्रः

द्‌र्‌य   द्र्य दारिद्र्यम्, अद्र्योः

द्‌व   द्व विद्वान्, द्वीपः, अद्वितीयः

द्‌व्‌य   द्व्य सद्व्ययः जगद्व्यापी

द्‌व्‌र   द्व्र तद्व्रतम्

ध्‌न   ध्न बुध्नः, कुण्डोध्नी, दध्ना

ध्‌म   ध्म इध्मः सिध्मलः, आध्मातः

ध्‌य   ध्य अयोध्या, साध्यम्, अध्ययनम्,
मध्यमः

ध्‌र   ध्र महीध्रः, ध्रुवम्

ध्‌र्‌य   ध्र्य सध्र्यङ्

ध्‌व   ध्व अध्वा, ध्वनिः, साध्वम्, ध्वजः

न्‌त   न्त शन्तनुः, कुन्तलाः, सन्ततिः,
कुन्तीपुत्रः

न्‌त्‌य न्त्य अन्त्यजाः, सन्त्यक्तः
न्‌त्‌र न्त्र सन्त्रासः, मन्त्रः, यन्त्रम्
न्‌त्‌र्‌य न्त्र्य आमन्त्र्य
न्‌त्‌व न्त्व सान्त्वम्, क्रान्त्वा
न्‌त्‌स न्त्स अभान्त्सीत्
न्‌थ न्थ मन्थदण्डः, पान्थाः, रोमन्थः
न्‌थ्‌य न्थ्य मन्थ्यः
न्‌द न्द नन्दनः, अरविन्दम्, गोविन्दः
आन्दोलनम्
न्‌द्‌म न्द्म अभिन्द्म
न्‌द्‌य न्द्य वन्द्यः, अभिनन्द्यः
न्‌द्‌र न्द्र सान्द्रः, इन्द्रः,मन्द्रः,इन्द्रियाणि
न्‌द्‌र्‌य न्द्र्य तन्द्र्या
न्‌द्‌व न्द्व द्वन्द्वम्,अभिन्द्व,
कन्द्वालोकन कौतुकात्पुनरहङ्क
च्छामि चेद्दापणम्
न्‌ध न्ध बन्धुः,सैन्धवः,रुन्धनम्,शकन्धुः

न्ध्म न्ध्म अबान्ध्म, इन्ध्महे
न्ध्य न्ध्य वन्ध्या, सन्ध्या
न्ध्र न्ध्र रन्ध्रम्, पुरन्ध्री
न्ध्व न्ध्व बन्ध्वभिमतम्, शकन्ध्वादिः
न्न न्न अन्नम्, सान्निवेशः, क्षुान्निवृत्तिः,
पुन्नागः
न्प न्प गच्छन्पिबति
न्फ न्फ बालानांभयमावहत्ययमहिः
कोपाद्विवृण्वन्फणाम्
न्ब न्ब रुदन्बालो जननीमभिगच्छति
न्भ न्भ जीवन्भद्राणी विन्दते
न्म न्म जन्म, मन्मथः, चिन्मयम्
न्य न्य धान्यम्, कन्या, वन्यफलानि
उदन्या
न्र न्र दीनान्रक्ष विभो
न्व न्व अन्वयः, धन्वी, मन्वन्तरम्,
आन्वीक्षकी

न्‌ह न्ह किरीन्हन्ति

प्‌त प्त सप्त, आप्तः, सुप्तोत्थितः

प्‌तय प्त्य प्राप्त्याशा

प्‌थ प्थ उत्वप्थ

प्‌न प्न आप्नोति

प्‌प प्प अप्पतिः, पिप्पलः

प्‌फ प्फ इयङ्क्कुप्फेरवरावभीषणा

प्‌म प्म विपाप्मा

प्‌य प्य आप्यायनम्, कुप्यम्

प्‌र प्र विप्रः, प्रकाशः, सुप्रभातम्,
सुप्रसन्नः

प्‌ल प्ल उपप्लवः, आप्लुताः, पिप्लुः

प्‌व प्व खलप्वः

प्‌स प्स ईप्सितः जुगुप्सा

ब्‌ज ब्ज अब्जः, कुब्जः, न्युब्जः

ब्‌झ ब्झ बडिशामिषलुब्झैरिमे
सदृशाः कामवशानुगा नराः

ब्ड ब्ड इयं ककुब्डीनविहङ्गमण्डिता
ब्द ब्द शब्दः, अब्दैवताः, अब्दपतिः
ब्ध ब्ध क्षुब्धः, लब्धम्,
प्रारब्धस्यान्तगमनन्द्वितीयं
बुद्धिलक्षणम्
ब्ब ब्ब बिब्बोकः
ब्भ ब्भ अब्भक्षः
ब्य ब्य वैक्लब्यम्, क्लैब्यम्
ब्र ब्र ककुब्भ्राजते,
अब्रूपाः प्राणिनः केचित्, ब्रसी
ब्रवीति, क्षत्रियब्रुवः
ब्ल ब्ल लिब्लप्, शाब्लोपः
ब्व ब्व लुब्वप्, अलाब्वाहिताभिक्षान्नः
भ्ण भ्ण गृभ्णामि
भ्न भ्न दभ्नोति, क्षुभ्नाति
भ्म भ्म जगृभ्म
भ्य भ्य सभ्यः, इभ्यः, अभ्यन्तरम्,
अभ्यासः

भ्‌र भ्र शुभ्रः,अदभ्रः, भ्राता, भ्रूकुटिः,
भ्रेषः

भ्‌ल भ्ल बभ्लुशः, भ्लाशते

भ्‌व भ्व प्रभ्वादेशः

म्‌ण म्ण नृम्णम्, अर्यम्णः

म्‌न म्न प्रद्युम्नः, आम्नायः

म्‌प म्प पम्पा, कम्पः, परम्परा, सम्पत्

म्‌फ म्फ सम्फालः, सम्फेटः,गुम्फः

म्‌ब म्ब शम्बरारिः, अम्बुजाक्षी

म्‌भ म्भ सम्भाराः, कुम्भः,शम्भुः,करम्भः

म्‌म म्म सम्मतिः, ऐरम्मदः,

म्‌य म्य पारम्यम्, काम्यम्, याम्या

म्‌र म्र आम्रम्, साम्राज्यम्, कम्रः, नम्रः

म्‌ल म्ल अम्लम्, अम्लानः, निम्लोचः

म्‌व म्व चम्वाः

य्‌य य्य साहाय्यम्,सान्नाय्यम्, न्याय्यम्

य्‌व य्व गोमाय्वागतिरेव सूचयति वो
भाग्यम्भवेदायतौ

र्‌क र्क अर्कः, कर्कशः, मर्कटः, उदर्कः

र्‌ख र्ख मूर्खः

र्‌ग र्ग वर्गः, अर्गला, भार्गवी

र्‌घ र्घ अर्घः, घर्घररवः

र्‌ङ र्ङ शार्ङ्गी

र्‌च र्च चर्चा, अर्चकः, वर्चः,कूर्चः

र्‌छ र्छ मूर्छना

र्‌ज र्ज जर्जरः,गुर्जरी, मार्जारः,अर्जुनः

र्‌झ र्झ झर्झरः

र्‌ट र्ट अमार्ट्

र्‌ठ र्ठ

र्‌ड र्ड मार्डितारं

र्‌ढ र्ढ कविर्ढुण्ढिरभूदिह

र्‌ण र्ण अभ्यर्णः,पूर्णता,सम्पूर्णः

र्‌त र्त गर्तः, आवर्तः,संवर्तः, निवर्तनम

र्‌थ र्थ पार्थः,अर्थः,कृतार्थः, पार्थिवाः

र्‌द र्द कपर्दी, वितर्दिका, अहार्दिवम्

र्ध र्ध भुजबलवर्धनः,निर्धारणा,दुर्धरः
र्न र्न अहर्निशम्, दुर्नीतम्
र्प र्प शूर्पः, कर्परः, कार्पासकः, घ्राण-
तर्पणः
र्फ र्फ वर्फति
र्ब र्ब अर्बुदम्, कर्बुरः
र्भ र्भ दर्भाः,अर्भकः,वैदर्भी,निर्भीकः
र्म र्म कर्मठः मर्मज्ञं न प्रकोपयेत्
र्य र्य आहार्यः, वीर्यम्,अर्यमा
र्ल र्ल अन्तर्लीनः,भुवर्लोकः,दुर्ललितः
र्व र्व गन्धर्वः,चार्वङ्गी,अपूर्वम्,चर्वणम्
र्श र्श दर्शनम्,कर्शितः,परामर्शः
र्ष र्ष सर्षपः, कर्षः, वर्षपः, सप्तर्षयः
र्ह र्ह अर्हणा, तर्हि, गार्हपत्यः,
ल्क ल्क वल्कलः,किञ्जल्कः
ल्ग ल्ग वल्गु,फाल्गुनः
ल्प ल्प सङ्कल्पः,तल्पः,जल्पाकः
ल्फ ल्फ गुल्फः

ल्ब ल्ब उल्बणः,बल्बजः

ल्भ ल्भ प्रगल्भः

ल्म ल्म गुल्मः, जाल्मः

ल्य ल्य मूल्यम्, कल्याणः

ल्व ल्व पल्वलः,खल्वाटः

ल्ह ल्ह कल्हारः, कल्हणः

व्य व्य काव्यम्,व्याजः,व्ययः,व्यत्यासः,
व्यूहः, व्यापारः

व्र व्र तीव्रम्, प्रव्रज्या

व्ल व्ल विव्लायः

व्व व्व

श्च श्च निश्चयः दुश्चिक्यं,पश्चिमः,व्रश्चनः

श्छ श्छ यश्छन्दमनुवर्तते

श्न श्न श्न प्रश्नः, सुखमश्नुते

श्प श्प विश्पतिः

श्म श्म अश्मकः,रश्मिमाली,वेश्म

श्य श्य अवश्यायः,वेश्या

श्र श्र विश्रान्तिः,श्रियःपतिः,श्रोत्रम्

श्‌ल श्ल परिश्लथः, आश्लेषः, श्लीपदः
श्‌व श्व विश्वावसुः, अश्वघाटी, श्वयथुः
श्‌श श्श यश्शङ्करं प्रणमति प्रणिधाय तस्मि-
ञ्चित्तं न तस्य पुनरत्र जनिर्धरण्याम्,
दुश्शासनः
ष्‌क ष्क पुष्करम्, विष्किरः
ष्‌ट ष्ट विष्टरः, समिष्टिः, अष्टापदम्, षष्टिकाः
ष्‌ट्‌र ष्ट्र दंष्ट्रा, उष्ट्राः
ष्‌ठ ष्ठ सुवर्णष्ठीवी, निष्ठुरः, षष्ठः, अष्ठीला
ष्‌ठ्‌य ष्ठ्य निष्ठ्यूतम्
ष्‌ण ष्ण नदीष्ण, निष्णातः उष्णीषिणः
ष्‌प ष्प निष्पावः, पुष्पिणी
ष्‌प्‌र ष्प्र निष्प्रत्यूहम्
ष्‌फ ष्फ निष्फलम्
ष्‌म ष्म श्लेष्मातकः, ग्रीष्मः
ष्‌य ष्य प्रेष्यः, भुजिष्या
ष्‌व ष्व विष्वक्सेनः, इष्वसनम्
ष्‌ष ष्ष चतुष्षष्टिः

स्‌क स्क यास्कः, प्रस्कण्वः, मस्करी, नस्करः
आस्कन्दः, भास्करः

स्‌ख स्ख स्खलनम्

स्‌त स्त प्रस्तरः, व्यत्यस्तम्, स्तिमितः

स्‌त्‌र स्त्र वस्त्रम् वारस्त्री शास्त्रोक्तम्

स्‌थ स्थ स्थलम्, सुस्थितः

स्‌न स्न सास्ना, स्नातः, प्रस्नुतस्तनी

स्‌प स्प आस्पदम्, स्पर्धा

स्‌फ स्फ स्फुटम्, स्फीतः, आस्फालनम्

स्‌म स्म स्मेरम्, घस्मरः, विस्मरणम्

स्‌य स्य मधुस्यन्दः, अनुस्यूतः वयस्यः

स्‌र स्र घस्रः, विस्रसनम्, स्रोतः

स्‌व स्व आस्वादः, स्वीकरणम्, स्विन्नमुखः

स्‌स स्स भिस्सा, निस्सरणम्

ह्‌ण ह्ण ह्ण अपराह्णः

ह्‌न ह्न सायाह्नः आह्निकम् वह्निः

ह्‌म ह्म ब्राह्मणः

ह्‌य ह्य बाह्यः, लेह्यम्, दाह्यम्

ह्र   ह्र ह्रदः, दर्हम्

ह्ल   ह्ल आह्लादः

ह्व   ह्व प्रह्वः, जिह्वा, बह्वृचाः

अभ्यास : ८

यं ब्रह्म वेदान्तविदो वदन्ति
परं प्रधानं पुरुषं तथान्ये ॥
विश्वोद्गतेः कारणमीश्वरं वा
तस्मै नमो विघ्नविनायकाय ॥ १ ॥

एकदन्तं महाकायं तप्तकाञ्चनसन्निभम् ।
लम्बोदरं विशालाक्षं वन्देहं गणनायकम् ॥२॥

मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनम् ।
बालेन्दुशकलं मौलौ वन्देहं गणनायकम्॥ ३॥

चित्ररत्नविचित्राङ्गं चित्रमालाविभूषितम् ।
कामरूपधरं देवं वन्देहं गणनायकम्॥४॥

गजवक्त्रं सुरश्रेष्ठं कर्णचामरभूषितम् ।
पाशाङ्कुशधरं देवं वन्देहं गणनायकम् ॥५॥

मूषकोत्तममारुह्य देवासुरमहाहवे ।
योद्धुकामं महावीर्यं वन्देहं गणनायकम् ॥६॥

यक्षकिन्नरगन्धर्वसिद्धविद्याधरैः सदा ।
स्तूयमानं महाबाहुं वन्देहं गणनायकम् ॥७॥
अम्बिकाहृदयानन्दं मातृभिः परिवेष्टितम् ।
भक्तप्रियं मदोन्मत्तं वन्देहं गणनायकम् ॥८॥
सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितम् ।
सर्वसिद्धिप्रदातारं वन्देहं गणनायकम् ॥९॥
गणाष्टकमिदं पुण्यं यः पठेत्सततं नरः ।
सिध्यन्ति सर्वकार्याणि विद्यावान्धनवान् भवेत् ।

अभ्यासः ६.

मूषिकवाहन मोदकहस्त
चामरकर्णविलम्बितसूत्र ।
वामनरूपमहेश्वरपुत्र
विघ्नविनायकपाद नमस्ते ॥
गजाननं भूतगणाधिसेवितं
कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वरपादपङ्कजम् ॥

ॐदेवदेवसुतं देवं जगाद्विघ्नविनाशनम् ।
हस्तिरूपं महाकायं सूर्यकोटिसमप्रभम्॥ १ ॥
वामं जटिलं कान्तं ह्रस्वग्रीवं महोदरम् ।
धूम्रसिन्दूरयुग्गण्डं विकटं प्रकटोत्कटम् ॥ २ ॥
एकदन्तं प्रलम्बोष्ठं नागयज्ञोपवीतिनम् ।
त्र्यक्षं गजमुखं कृष्णं सुकृतं रक्तवाससम् ॥३॥
दन्तपाणिं च वरदं ब्रह्मण्यं ब्रह्मचारिणम् ।
पुण्यं गणपतिं दिव्यं विघ्नराजं नमाम्यहम्॥४॥
देवं गणपतिं नाथं विश्वस्याग्रे तु गामिनम् ।
देवानामधिकं श्रेष्ठं नायकं सुविनायकम् ॥५॥
नमामि भगवन्देवमद्भुतं गणनायकम् ॥
वक्रतुण्डप्रचण्डाय उग्रतुण्डाय ते नमः ॥ ६ ॥
चण्डाय गुरुचण्डाय चण्डचण्डाय ते नमः ।
मत्तोन्मत्तप्रमत्ताय नित्यमत्ताय ते नमः ॥ ७ ॥
उमासुतं नमस्यामि गङ्गापुत्राय ते नमः ।
ओङ्काराय वषट्कारस्वाहाकाराय ते नमः ॥ ८ ॥
मन्त्रमूर्त्ते महायोगिन् जातवेदो नमो नमः ।
परशुपाशकहारताय गजहस्ताय ते नमः ॥ ९ ॥

मेघाय मेघवर्णाय मेघेश्वर नमो नमः ।
घोराय घोररूपाय घोरघोराय ते नमः ॥ १० ॥
पुराणपूर्वपूज्याय पुरुषाय नमो नमः ।
मदोत्कट नमस्तेऽस्तु नमस्ते चण्डविक्रम॥११॥
विनायक नमस्तेस्तु नमस्ते भक्तवत्सल ।
भक्तप्रियाय शान्ताय महातेजस्विने नमः॥१२॥
यज्ञाय यज्ञहोत्रे च यज्ञेशाय नमो नमः ।
नमस्ते शुक्लभस्माङ्ग शुक्लमालाधराय च ॥१३
मदक्लिन्नकपोलाय गणाधिपतये नमः ।
रक्तपुष्पप्रियायाथ रक्तचन्दनभूषित ॥ १४ ॥
अग्निहोत्राय शान्ताय अपराजय्य ते नमः ।
आखुवाहन देवेश एकदन्ताय ते नमः ॥१५॥
शूर्पकर्णाय शूराय दीर्घदन्ताय ते नमः ।
विघ्नं हरतु देवेशः शिवपुत्रो विनायकः ॥१६॥
जपादस्यैव होमाच्च सन्ध्योपासनतस्तथा ।
विप्रो भवति वेदाढ्यः क्षत्रियो विजयी भवेत्
वैश्यस्तु धनमाप्नोति शूद्रः पापैः प्रमुच्यते ।
गर्भिणी जनयेत्पुत्रं कन्या भर्त्तारमाप्नुयात्॥१८॥

प्रवासी लभेत स्थानं बद्धो बन्धात्प्रमुच्यते ।
इष्टसिद्धिमवाप्नोति पुनात्यासप्तमं कुलम् १९
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।
सर्वकामप्रदं पुण्यं पठतां शृण्वतामपि ॥२०॥

मूषिकवाहन मोदकहस्त
चामरकर्ण विलम्बितसूत्र ।
वामनरूप महेश्वरपुत्र
विघ्नविनायकपाद नमस्ते ॥ २१ ॥

इति ब्रह्माण्डपुराणे स्कन्दप्रोक्तं विनायकस्तोत्रं सम्पूर्णम्. हरिः ओम्.

अभ्यास--७

या कुन्देन्दुतुषारहारधवला
या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा
या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभि-
र्देवैः सदा पूजिता
सा मां पातु सरस्वती भगवती
निःशेषजाड्यापहा ॥ १ ॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयी-
मक्षमालां दधाना
हस्तेनैकेन पद्मं सितमपि च शुकं
पुस्तकं चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा
भासमाना समाना
सा मे वाग्देवतेयं निवसतु वदने
सर्वदा सुप्रसन्ना ॥ २ ॥

सुरासुरासेवितपादपङ्कजा
करे विराजत्कमनीयपुस्तका ।
विरिञ्चिपत्नी कमलासनस्थिता
सरस्वती नृत्यतु वाचि मे सदा ॥ ३ ॥

सरस्वती सरसिजकेसरप्रभा
तपस्विनी सितकमलासनप्रिया ।
घनस्तनी कमलविलोललोचना
मनस्विनी भवतु वरप्रसादिनी ॥ ४ ॥

सरस्वति नमस्तुभ्यं
वरदे कामरूपिणि ।

विद्यारम्भं करिष्यामि
  सिद्धिर्भवतु मे सदा ॥ ५ ॥
सरस्वति नमस्तुभ्यं
  सर्वदेवि नमो नमः ।
शान्तरूपे शशिधरे
  सर्वयोगे नमो नमः ॥ ६ ॥
नित्यानन्दे निराधारे
  निष्कलायै नमो नमः ।
विद्याधारे विशालाक्षी
  शुद्धज्ञाने नमो नमः ॥ ७ ॥
शुद्धस्फटिकरूपायै
  सूक्ष्मरूपे नमो नमः ।
शब्दब्राह्मि चतुर्हस्ते
  सर्वसिद्ध्यै नमो नमः ॥ ८ ॥
मुक्तालंकृतसर्वाङ्ग्यै
  मूलाधारे नमो नमः ।
मूलमन्त्रस्वरूपायै
  मूलशक्त्यै नमो नमः ॥ ९ ॥

मनोमयि महायोगे
  वागीश्वरि नमो नमः ।
वाण्यै वरदहस्तायै
  वरदायै नमो नमः ॥ १० ॥
वेद्यायै वेदरूपायै
  वेदान्तायै नमो नमः ।
गुणदोषविवर्जिन्यै
  गुणदीप्त्यै नमो नमः ॥ ११ ॥
सर्वज्ञाने सदानन्दे
  सर्वरूपे नमो नमः
सम्पन्नायै कुमार्यै च
  सर्वज्ञे ते नमो नमः ॥ १२ ॥
योगनार्यां उमादेव्यै
  योगानन्दे नमो नमः ।
दिव्यज्ञाने त्रिनेत्रायै
  दिव्यमूर्त्यै नमो नमः ॥ १३ ॥
अर्द्धचन्द्रजटाधारि
  चन्द्रबिम्बे नमो नमः ।

P. 27 94

चन्द्रादित्यजटाधारि
  चन्द्रबिम्बे नमो नमः ॥ १४ ॥
अणुरूपे महारूपे
  विश्वरूपे नमो नमः ।
अणिमाद्यष्टसिद्धायै
  आनन्दायै नमो नमः ॥ १५ ॥
ज्ञानविज्ञानरूपायै
  ज्ञानमूर्त्यै नमो नमः ।
नानाशास्त्रस्वरूपायै
  नानारूपे नमो नमः ॥ १६ ॥
पद्मदा पद्मवंशा च
  पद्मरूपे नमो नमः ।
परमेष्ठ्यै परामूर्त्यै
  नमस्ते पापनाशिनि ॥ १७ ॥
महादेव्यै महाकाल्यै
  महालक्ष्म्यै नमो नमः ।
ब्रह्मविष्णुशिवायै च
  ब्रह्मनार्यै नमो नमः ॥ १८ ॥

कमलाकरपुष्पायै
कामरूपे नमो नमः ।
कपालिकर्मदीप्तायै
कर्मदायै नमो नमः ॥ १९ ॥
सायं प्रातः पठेन्नित्यं
षाण्मासात् सिद्धिरुच्यते ।
घोरव्याघ्रभयं नास्ति
पठतां शृण्वतामपि ॥ २० ॥
इत्थं सरस्वतीस्तोत्र-
मगस्त्यमुनिवाचकम् ।
सर्वसिद्धिकरं नृणां
सर्वपापप्रणाशनम् ॥ २१ ॥
इत्यगस्त्यमुनिप्रोक्तं सरस्वतीस्तोत्रं सं०

अभ्यास—८

नतखेटनिशाटकिरीटतटी
घटितोपलपाटलपठितलम् ।
तटिदाभजटापटलीमुकुटम्
वटमूलकुटीनिलयं कलये ॥ १ ॥

स्मरणं खलु यच्चरणाम्बुजयो-
र्भरणाय भवोत्तरणाय भवेत् ।
शरणं करुणावरुणावसथम्
भज बालसुधाकिरणाभरणम् ॥ २ ॥
परिकीर्णसुवर्णसवर्णजटा-
भ्रमदभ्रसरिच्छरदभ्ररुचिः ।
मकुटीकुटिलं छटयन् शशिनम्
निटिलेनलदृग्जटिलो जयति ॥३॥
वरभूजकुटीघटितस्फटिको-
पलकुट्टिमवेदितले विमले ।
स्मितफुल्लमुखं चिदुपात्तसुखम्
पुरवैरिमहः करवै हृदये ॥ ४ ॥
अकलङ्कशशाङ्कसहस्रसहो-
दरदीधितिदीपितदिग्वलयम् ।
निगमागमनीरधिनिर्मथनो-
दितमाकलयाम्यमृतं किमपि ॥ ५ ॥
विषभूषमपाकृतदोषचयं
मुनिवेषविशेषमशेषगुरुम् ।

धृतचिन्मयमुद्रमहं कलये
गतनिद्रसमुद्रसमाधिविधौ ॥ ६ ॥

हठयोगरसानुभवोत्कलिकं
प्रसरत्पुलकं क्रतुभुक्तिलकम् ।
भसितोल्लसितालिकविस्फुरिता-
नलदृक्तिलकं कलयेन्दुशिखम् ॥ ७ ॥

वद चित्त किमात्तमभूद्भवता
भ्रमता बहुधाखिलदिक्षु मुधा ।
निजशर्मकरं कुरु कर्म परम
भवमेव भवापहमाकलय ॥ ८ ॥

वरपुस्तकहस्तमपास्ततमः
श्रुतिमस्तकशस्तसमस्तगुणम् ।
मम निस्तुलवस्तु पुरोस्तु वरम्
प्रणवप्रवणप्रवरावगतम् ॥ ९ ॥

इति दक्षिणामूर्तिस्तोत्रं सम्पूर्णम् ॥

अति भीषणकटुभाषण-
  यमकिङ्करपटली-
कृतताडनपरिपीडन-
  मरणागमसमये ।
उमया सह मम चेतसि
  यमशासन निवसन्
शिव शङ्कर शिव शङ्कर
  हर मे हर दुरितम् ॥ १ ॥
असदिन्द्रियविषयोदय-
  सुखसात्कृतसुकृतेः
परदूषणपरिमोक्षण-
  कृतपातकविकृतेः ।
शमनाननभवकानन-
  निरतेर्भव शरणम्
शिव शंकर शिव शंकर
  हर मे हर दुरितम् ॥ २ ॥
विषयाभिधबडिशायुध-
  पिशितायितसुखतो

मकरायितगतिसंसृति-
कृतसाहसविपदम् ।
परमालय परिपालय
परितापितमनिशम्
शिव शंकर शिव शंकर
हर मे हर दुरितम् ॥ ३ ॥

दयिता मम दुहिता मम
जननी मम जनको
मम कल्पितमतिसन्तति-
मरुभूमिषु निरतम् ।
गिरिजासख जनितासुख-
वसतिं कुरु सुखिनम्
शिव शंकर शिव शंकर
हर मे हर दुरितम् ॥ ४ ॥

जनिनाशन मृतिमोचन
शिवपूजननिरते-
रभितोऽदृशमिदमीदृश-
महमावह इति हा ।

गजकच्छपजनितश्रम
   विमलीकुरु सुमतिम्
शिव शंकर शिव शंकर
   हर मे हर दुरितम् ॥ ५ ॥
त्वयि तिष्ठति सकलस्थिति-
   करुणात्मनि हृदये
वसुमार्गणकृपणेक्षण-
   मनसा शिव विमुखम् ।
अकृताह्निकमसुपोषक-
   मवतादिगिरिसुतया
शिव शंकर शिव शंकर
   हर मे हर दुरितम् ॥ ६ ॥
पितरावतिसुखदाविति
   शिशुना कृतहृदयौ
शिवया हृतभयके हृदि
   जनितं तव सुकृतम् ।
इति मे शिव हृदयं भव
   भवतात्तव दयया

शिव शंकर शिव शंकर
हर मे हर दुरितम् ॥ ७ ॥
शरणागतभरणाश्रित
करुणामृतजलधे
शरणं तव चरणौ शिव
मम संसृतिवसतेः ।
परचिन्मय जगदामय
भिषजे नतिरवतात्
शिव शंकर शिव शंकर
हर मे हर दुरितम् ॥ ८ ॥
विविधाधिभिरतिभीतिभि-
रकृताधिकसुकृतम्
शतकोटिषु नरकादिषु
हतपातकविवशम् ।
मृड मामव सुकृती भव
शिवया सह कृपया
शिव शंकर शिव शंकर
हर मे हर दुरितम् ॥ ९ ॥
कलिनाशन गरलाशन

कमलासनविनुत
कमलापतिनयनार्चित-
करुणाकृतिचरण ।
करुणाकर मुनिसेवित
भवसागरहरण
शिव शंकर शिव शंकर
हर मे हर दुरितम् ॥ १३ ॥

इति शिवशंकरस्तोत्रं सम्पूर्णम्. हरीः ओम्.

॥अभ्यास ९ पाठावलिः ॥

१. प्रथमः पाठः देवंप्रति प्रार्थना.

आर्य त्वां वन्दे
वत्स आयुष्मान् भव
भद्रं नो भूयात् देव नक्तन्दिवमस्मान् पाहि जीवेम शरदः शतम्
यतोदेव बिभीयाम कुरुतान्नोऽभयं ततः
अन्नमस्माकं बहु भूयात् अन्नादाश्च भूयास्म अन्नवन्तः अन्नादाश्च लोके सुखिनो भवन्ति

बालाय बुभुक्षिताय प्रातराशं देहि

देवं नमस्याम देवस्य हि प्रसादेन सुस्था वयं वर्त्तामहे.

॥ २. द्वितीयः पाठः माता ॥

माता शिशुं धापयति
अङ्के कृत्वा लालयति
मृदौ शय्यायां शाययति
आर्त्तं बाहुभ्यां धृत्वा स्वापयति
न मातृतुल्यास्ति शरीरपोषणे
अतएव माता शिशवे रोचते

मातुश्च अदर्शने रोदिति

वत्सला हि माता शिशुं विहाय चिराय यत्र क्वचन नावतिष्ठते

शिशोः मात्रा समा नास्ति शरीरपोषणे इत्यवोचाम.

---

३. तृतीयः पाठः सत्यस्य भाषणम् -

सत्यमेव सदा वदत

यः सत्यं वदति तेन देवः प्रीयते मातापितरौ प्रीयेते, जनाः प्रीयन्ते

सत्येन पूतो भवति। सत्यव्रतां सर्वे मनोरथाः सिध्यन्ति

अतो माता पिता गुरुरन्ये च हितैषिणो बालं सत्यं ब्रूया इत्येवानुशासति-

४. चतुर्थः पाठः शंकरदत्तः.

अस्ति शङ्करदत्तो नाम पञ्चवर्षो बालः तं च पितामहः प्रीत्या वर्धयति

सर्वं च पितामहेन क्रियमाणं स स्वयं चिकीर्षति समान एव आसने उपविविक्षति समान एव पात्रे आत्मने अन्नं परिविष्टमिच्छति पितामहवत मामुपचरेति गृहजनं याचते

बाल इति सर्वोऽपि गृहजनस्तमुपच्छन्दयति.

५. पञ्चमः पाठः निदाघे प्रणाल्या व्यवस्था-निदाघ ऋतौ सूर्यस्य आतपो मध्याह्ने चण्डो भवति

तेन नदीषु सरःसु कूपेषु च जलं स्तोकं भवति

अतो नगर्यामस्यां सदा प्रणाल्यां जलं न प्रवाहयन्ति

प्रभाते पञ्चषाः सायाह्ने च द्वित्रा घटिकाः प्रणाल्यां जलं लभ्यते

पशून् मनुष्यांश्च तृषा भृशं मध्याह्ने बाधते

---

६. षष्ठः पाठः गोदोहः.

प्रत्यहं दुग्धं पयः प्रभवः पिबन्ति

गावस्तेषां गृहं प्रदोषे प्रातश्चानीयन्ते

दोग्ध्यः प्रथमम् दोहनीरवाङ्मुखीः कृत्वा तत्रत्यं जलं भूमौ निनयन्ति पश्चात्ता उदच्य तासु पयो दुहन्ति

सद्यो दुग्धं पयः फेनिलं कदुष्णञ्च वर्त्तते तथास्थितमेव केचिदामयाविनः पिबन्ति.

---

७. सप्तमः पाठः पितामही.

प्रगएव उत्थिता पितामही रसवत्यां भूतलं गोमयेन लिम्पति

अन्यांश्च गृहभागान् जलेन सिक्त्वा सम्मार्ष्टि

दधि मन्थति चुल्ल्यामिन्धनं निधाय प्रज्वालयति

ततो गृहजनः सर्वः प्रबुध्य स्वं स्वं कार्यमवेक्षते

सुप्तोत्थिताः शिशवः पितामहीं प्रातराशं याचन्ते सा तेभ्यः स्वादुतरं भक्ष्यं पेयञ्च ददाति.

पितामह्या समा नान्या काचिदस्ति अतस्तां सर्वे वयं बहुमन्यामहे.

---

८. अष्टमः पाठः । आरामः

भवनस्य समन्ततः आरामः कल्प्यते. तत्र नारिकेलाः सहकाराः पुष्पलाताश्च रोहन्ति. तान् परितः आलवालानि विरचितानि सन्ति. तेषु प्रत्यहं सायं वा प्रातर्वा प्रभूतं जलं घर्मकाले निषिच्यते

वृक्षा लताश्च कुसुमिता भवन्ति. अतो वातः सुरभिर्वाति. प्रच्छायशीतलेषु तरुतलेषु रोचते अस्मभ्यमुपवेष्टुम्.

९. नवमः पाठः । पितृष्वस्रा अध्यापनम् ।

पितृष्वसा मामक्षराणि शिक्षयते. अध्ययनकाले पराङ् माभूः. अभिमुखो भवेति मामादिशति

अक्षराणां लिखनं वाचनं वा क्लिश्नाति यदि न शिक्षेय पितृष्वसा मे कुप्येत् खेलितुं कन्दुकञ्च न दद्यात् मयाच न सम्भाषेत कुपितां तां नमस्कृत्य प्रसादयामि

सा मामित्थं वाचयति "अहं शङ्करदत्त इतः परं विधेयो भविष्यामि यथाकालं लिखामि वाचयामि अवसिते पाठे कन्दुकेन खेलामि" इति

१०. दशमः पाठः पयः

नगरस्य नातिदूरे आभीराणां पल्ली वर्त्तते. ततः दधि घृतं विक्रेतुं नगरमागच्छन्ति बहवः शूद्रा नार्यः

दधि पयस उद्भवति पयो गोभिर्महिषीभिश्च दीयते।

दुग्धा गावो महिष्यश्च गोचरान् प्रस्थाप्यन्ते। घासो गोचरेषु भूयान् रोहति तं चरन्त्यो गावो महिष्यश्च पयस्वत्यो भवन्ति।

येषां गोधनमस्ति ते धन्याः सुखेन च जीवन्ति.

११. एकादशः पाठः-शिशुरक्षणम्.

अस्तमिते सूर्ये माता बालानस्मान् अन्नमाशयति शिशूंश्च दुग्धं पाययति

जग्धवन्तो वयं कश्चित् कालं कथाः शृणुमः शय्यासु शायितानस्मान् जननी प्रत्यहं कथाः श्रावयति

तासु चटकायाः कथा अस्मभ्यमतीव रोचते

पुरा किल चटका पायसं चिकीर्षन्ती यद्यदाचरत् तत् स्वप्स्यद्भ्यः अस्मभ्यं माता कथयति

सुप्ताश्च वयं प्रभात एव प्रबुध्यामहे.

१२. द्वादशः पाठः नूतनौ बलीवर्दौ.

आवयोः पिता पीवानौ बलीवर्दावक्रीणात्

तौ शकटस्य धुरि योजयित्वा वाहयति प्रत्यहं सायम्

सुन्दरं यात इति श्रूयते

न कोऽपि तावासत्तुं धृष्णोति अग्रत आगतान् विषाणाभ्यां विलिखितुमीहेते पृष्ठत उपसर्पतः पाश्चात्यैः खुरैः प्रजिहीर्षतः नियन्ताऽपि चकित एव तावासीदति

यावत् दान्तौ धुरं वहतः तावदेव तौ स्वं ग्रामं निनीषावहे.

---

१३. त्रयोदशः पाठः आजिधावनम्.

अतीते दशरात्रे बहव आजिमधावन्
केचित् पद्भ्यामधावन् यानारूढाश्च केचित्
आजेः दिदृक्षया बहवः समायन्
अलङ्कृतान् खरानारुह्य आजौ स्पर्धमाना
रजकदारका मिलितस्य सर्वस्यापि
प्रेक्षकजनस्य भूयांसं विनोदमावहन्
प्रतिवर्षमितः परमत्र दशरात्रे आजिं दिदृक्षामहे.

१४. चतुर्दशः पाठः क्रीडनकानि

पितामह आपणात् क्रीडनकान्यानयत् चतस्रस्स्वसारो वयं तान्यगृह्णाम तेषां चारुतमं कनिष्ठा शारदा जिघृक्षति कनीयस्यौ अन्ये मे

T 253
Acc No 2597

स्वसारौ ममैवेदमस्तु ममैवेदमस्तु इति ब्रुवत्यौ शारदया कलहमकुरुताम्

ज्यायसी कनीयसीं उपच्छन्द्य लालयितुमर्हतीति जननी ब्रूते अतो जनन्या अभिमतं चिकीर्षाम.

---

१५. पञ्चदशः पाठः अग्निरथः

अहरहरग्निरथोऽत्र द्विरायाति द्विश्चप्रातिष्ठ

सायं प्रातर्मध्यन्दिने च रथ्यायां यात्रिकाः पद्भ्यां शकटेन वा अग्निरथस्य अधिष्ठानं गच्छ ततो निवर्त्तमानांश्च पश्यामः

अचिरेण श्रीरङ्गपट्टणे गरलपुर्याञ्च देवालये महोत्सवो भविता तत्र पितृभ्यां सह वयं गन्तास्मः

नवानि वासांसि क्रीडनकानि च लब्धास्महे

ERRATA.

	Line.	For.	Read.
	5	काल	कौल
	6	यत	यतै
	7	कुटलालका	कुटिलालका
	6	इक्ष्वाकुबशे	इक्ष्वाकुवंशे
	6	[illegible]ः	शिग्रुः
	5	मक्ष्ण	मक्षु
	15	ध्वक्षः	ध्वाक्षः
	10	अमर्ट्ट	अमार्ट्
	12	विस्रसनम्	विस्रंसनम्
	3	वाम	वामनं
	18	हास्ताय	हस्ताय
	15	सन्ध्यापोसनतस्तथा	सन्ध्योपासनतस्तथा
	11	नृणां	नृणां
	16	पठितलम्	पीठतलम्
	17	मुकुटम्	मकुटम्
9	8	हरीः ओम्	हरिः ओम्
2	6	नगर्या मस्यां	नगर्यामस्यां
3	3	पत्तामही	पितामही
4	3	पुष्पलाताश्च	पुष्पलता[illegible]
8	9	गच्छत	गच्छतः

ಪುಸ್ತಿಕೆ ಸಂಖ್ಯೆ 12794